वाल्मीकी०
रामायण०
अरण्य०

१

श्रीगणेशाय नमः श्रीरामो जयति सर्वदा सरस्वत्यै नमः प्रविश्य तु महारण्यं दण्डकारण्यमात्म
वान् ददर्श रामो दुर्धर्षस्तापसाश्रममण्डलम् १ कुशचीरपरिक्षिप्तं ब्राह्म्या लक्ष्म्या समावृतम् य
था प्रदीप्तं दुर्दर्शं गगने सूर्यमण्डलम् २ शरण्यं सर्वभूतानां सुसंमृष्टाजिरं सदा मृगैर्बहुभिराकी
र्णं पक्षिसंघैः समावृतम् ३ पूजितं चोपनृत्तं च नित्यमप्सरसां गणैः आरण्यैश्च महावृक्षैः
पुण्यैः स्वादुफलैर्वृतम् ४ विशालैरग्निशरणैः स्रुग्भाण्डैरजिनैः कुशैः समिद्भिस्तोय
कलशैः फलमूलैश्च शोभितम् ५ बलिहोमार्चितं पुण्यं ब्रह्मघोषनिनादितम् पुष्पैर्वन्यैः
परिक्षिप्तं पद्मिन्या च सपद्मया ६ फलमूलाशनैर्दान्तैश्चीरकृष्णाजिनाम्बरैः सूर्यवैश्वा
नराभैश्च पुराणैर्बहुभिर्वृतम् ७ पुण्यैश्च नियताहारैः शोभितं परमर्षिभिः तद्ब्रह्म
भवनप्रख्यं ब्रह्मघोषविनादितम् ८ ब्रह्मविद्भिर्महाभागैर्ब्राह्मणैरुपशोभितम्

वा०आ०

ते वयं भवतारक्ष्या भवद्विषयवासिनः २० नगरस्थो वनस्थो वा त्वं नो राजा जनेश्वरः न्यस्त
दण्डा वयं राजन्जितक्रोधा जितेन्द्रियाः २१ रक्षितव्यास्त्वया शश्वद्गर्भभूतास्तपोधनाः ए
वमुक्त्वा फलैर्मूलैः पुष्पैरन्यैश्च पार्थिवम् २२ वन्यैश्च विविधाहारैः सलक्ष्मणमपूजयन्
तथान्ये तापसाः सिद्धा रामं वैश्वानरोपमम् २३ न्यायवृत्ता यथान्यायं तर्पयामासुरीश्व
रम् २४ इत्यार्षे रामायणे वाल्मीकीये आरण्यकाण्डे प्रथमः सर्गः १ कृतातिथ्योऽथ रामस्तु
२ सूर्यस्योदयनं प्रति आमन्त्र्य स मुनीन्सर्वान्वनमेवान्वगाहत १ नानामृगगणाकी २
र्णमृक्षशार्दूलसेवितम् ध्वस्तवृक्षलतागुल्मं दुर्दर्शसलिलाशयम् २ निःकूजन्नानाश
2 कुनिर्झिल्लिकागणनादितम् लक्ष्मणानुगतो रामो वनमध्यं ददर्श ह ३ वनमध्ये तु का
कुत्स्थस्तस्मिन्घोरमृगायुते ददर्श गिरिशृङ्गाभं पुरुषादं महास्वनम् ४ गंभीरा
क्षं महावक्त्रं विकटं विकटोदरम् बीभत्सं विषमं दीर्घं विकृतं घोरदर्शनम् ५ वसानं

विराधं २

तं दृष्ट्वा राघवः श्रीमान् तापसाश्रममण्डलम् ९ अभ्यगच्छन्महातेजा विज्यं कृत्वा महद्धनुः
दिव्यज्ञानोपपन्नास्ते रामं दृष्ट्वा महर्षयः १० अभ्यगच्छंस्तदा प्रीता वैदेहीं च यशस्विनीम् मं
गलानि प्रयुंजानाः प्रत्यगृह्णन् दृढव्रताः १२ रूपं संहननं लक्ष्मीं सौकुमार्यं सुवेषताम्
ददृशुर्विस्मिताकारा रामस्य वनवासिनः १३ वैदेहीं लक्ष्मणं रामं नेत्रैरनिमिषैरिव आ
श्चर्यभूतान्ददृशुः सर्वे ते वनवासिनः १४ अत्रैनं हि महाभागाः सर्वभूतहिते रताः अति
थिं पर्णशालायां राघवं संन्यवेशयन् १५ ततो रामं स सत्कृत्य विधिना विधिनोपमाः
आजह्रुस्ते महाभागाः सलिलं धर्मचारिणः १६ मंगलानि प्रयुंजाना मुदा परमया युताम्
मूलं पुष्पं फलं वन्यमाश्रमं च महात्मनः १७ निवेदयित्वा धर्मज्ञास्ततः प्रांजलयोऽब्रुवन्
धर्मपालो जनस्यास्य शरण्यश्च महायशाः १८ पूजनीयश्च मान्यश्च राजा दण्डधरो गु
रुः इन्द्रस्यैव चतुर्भागः प्रजा रक्षति राघव १९ राजा तस्माद् दूरान् भोग्यान् भुंक्ते नमस्कृतः

भोगान् १

१०२१०अ१०

सीताप्रावेपतो दृष्ट्वा त्सुवाने कदली यथा तां दृष्ट्वा राघवः श्रीमान् विराधांकगतां शुभाम् १५
अब्रवील्लक्ष्मणं वाक्यं मुखेन परिशुष्यता पश्य सौम्य नरेन्द्रस्य जनकस्यात्मसंभवाम्
१६ मम भार्य्यां शुभाचारां विराधांके प्रवेशिताम् अत्यंत सुखसंवृद्धां राजपुत्रीं मनस्वि
नीम् १७ यदभिप्रेतमस्मासु प्रियं वरमयं च तत् कैकेय्यास्तु सुसंवृत्तं क्षिप्रमद्यैव ल
क्ष्मण १८ या न तुष्यति राज्येन पुत्रार्थे दीर्घदर्शिनी ययाहं सर्वभूतानां हितः प्रस्था
३ पितो वनम् १९ अद्येदानीं सकामा सा या माता मम मध्यमा २० परस्पर्शात्तु वैदेह्या ३
3 न दुःखतरमस्ति मे पितुर्विनाशात् सौमित्रे स्वराज्यहरणात्तथा २१ इति ब्रुवति
काकुत्स्थे बाष्पशोकपरिप्लुते अब्रवील्लक्ष्मणः क्रुद्धो रुद्धो नाग इव श्वसन् २२
अनाथ इव भूतानां नाथस्त्वं वासवोपमः मया प्रेष्येण काकुत्स्थ किमर्थं परितप्यसे
२३

चर्म वैयाघ्रं वसाद्युधिरोक्षितम्। आसपत्सर्वभूतानां व्यादितास्यमिवान्तकम्। ६ ऊचीन्
सिंहांश्चतुरो व्याघ्रान् द्वौ वृकौ पृषतान्दश। सविषाणं वसादिग्धं गजस्य च शिरो मह
त्॥ ७ अवसज्यायसे शूले विनदन्तं महास्वनम्। सरामं लक्ष्मणं चैव सीतां दृष्ट्वा च मैथि
लीम्। ८ अभ्यधावत्सुसंक्रुद्धः प्रजाः कालइवान्तकः। स कृत्वा भैरवं नादं चालयन्नि
व मेदिनीम्। ९ अंकेनादाय वैदेहीमपाक्रम्य ततोऽब्रवीत्। युवां जटाचीरधरौ सभा
र्यौ क्षीणजीवितौ १० प्रविष्टौ दण्डकारण्यं शरचापासिधारिणौ। कथं तापसयोर्वा
च वासः प्रमदया सह ११ अधर्मचारिणौ पापौ कौ युवां मुनिदूषकौ। अहं वनमिदं दुर्गं
विराधो नाम राक्षसः। चरामि सायुधो नित्यमृषिमांसानि भक्षयन्। रूपं नारी वरा
रोहा मम भार्या भविष्यति १३ युवयोः पापयोश्चाहं पास्यामि रुधिरं मृधे। तस्यै
वं ब्रुवतो दुष्टं विराधस्य महात्मनः। १४ श्रुत्वा सगर्वितं वचनं संभ्रान्ता जनकात्मजा

पृथिव्यांसर्वराक्षसाः ६ तपसाचापिमेप्राप्ताब्रह्मणोहिप्रसादजा शस्त्रेणावध्यतालो
केछेद्याभेद्यत्वमेवच ७ ५ उत्सृज्यप्रमदामेतामनपेक्षौयथागतम् त्वरमाणौप
लायेथांनवांजीवितमाददे ८ तंरामःप्रत्युवाचेदंकोपसंरक्तलोचनः राक्षसंविकृ
ताकारंविराधंपापचेतसम् ९ क्षुद्रधिक्त्वांतुहीनार्थंमृत्युमन्वेषसेध्रुवम् रणे
प्राप्स्यसिसंतिष्ठनमेजीवन्विमोक्ष्यसे १० ततःसज्यंधनुःकृत्वारामःसुनिशि
४ तान्शरान् सुशीघ्रमभिसंधायराक्षसंनिजघानह ११ धनुषाज्यागुणव ४
तासप्तबाणान्मुमोचह रुक्मपुङ्खान्महावेगान्सुपर्णानिलतुल्यगान् १२
५ तेशरीरंविराधस्यभित्त्वाबर्हिणवाससः निपेतुःशोणितादिग्धाधरण्यांपा
वकोपमाः १३ सविद्धोन्यस्यवैदेहींशूलमुद्यम्यराक्षसः अभ्यद्रवत्सुसं

शरेणानिहतस्यास्य मया क्रुद्धेन रक्षसः विराधस्य गतासोर्हि मही पास्यति शोणितम् २४
राज्यकामे मम क्रोधो भरते यो बभूव ह तं विराधे विमोक्ष्यामि वज्री वज्रमिवाचले २५ मम
भुजबलवेगवेगितः पततु शरोऽस्य महान् महोरसि व्यपनयतु तनोऽस्य जीवितं पततु त
तश्च मही विघूर्णितः २६ इत्यार्षे रामायणे वाल्मीकीये आरण्यकाण्डे द्वितीयः सर्गः २
इत्युक्तौ लक्ष्मणः श्रीमान् विराधं प्रहसन्निव कौ भवान्तौ वनं सम्प्रेत्य विचरन्तु यथा
सुखम् १ अथोवाच पुनर्वाक्यं विराधः पूरयन् वनम् आत्मानं पृच्छते ब्रूतं कौ यु
वां क्व गमिष्यथ २ तमुवाच ततो रामो राक्षसं ज्वलिताननम् पृच्छन्तं सुमहातेजा इ
क्ष्वाकुकुलमात्मनः ३ क्षत्रियौ वृत्तसम्पन्नौ विद्धि नौ वनगोचरौ त्वां तु वेदितुमिच्छा
वः कस्त्वं चरसि दण्डकान् ४ तमुवाच विराधस्तु रामं सत्यपराक्रमम् हन्त वक्ष्यामि ते
राजन् निबोध मम राघव ५ पुत्रः किल जवस्याहं माता मम शतह्रदा विराध इति मामाहुः

वत्सेऽनतः २५ तावारोप्य ततः स्कंधे राघवौ रजनीचरः विराधो विनदन् घोरं जगामाभिमुखो
वनम् २६ वनं महामेघनिभं प्रविष्टो द्रुमैर्महद्भिर्विविधैः समेतम् नानाविधैः पक्षिगणै
र्विचित्रं शिवायुतं व्यालमृगैर्विकीर्णम् २७ इत्यार्षे रामायणे वाल्मीकीये आरण्यकाण्डे तृ
तीयः सर्गः ३ ह्रियमाणौ तु तौ दृष्ट्वा वैदेही रामलक्ष्मणौ उच्चैः स्वरेण चुक्रोश विगृह्य सु
५ भुजावुभौ १ एषदाशरथी रामः सत्यवान्शीलवान्शुचिः रक्षसा रौद्ररूपेण ह्रियते सह
लक्ष्मणः २ मां वृका भक्षयिष्यन्ति शार्दूलद्वीपिनस्तथा माहरोत्सृज्य काकुत्स्थौ नमस्ते ५
5 राक्षसोत्तम ३ तस्यास्तद्वचनं श्रुत्वा वैदेह्या रामलक्ष्मणौ वेगं प्रचक्रतुर्वीरौ वधे तस्य दुरा
त्मनः ४ तस्य रौद्रस्य सौमित्रिः सव्यं बाहुं बभञ्ज ह रामस्तु दक्षिणं बाहुं तरसा तस्य राक्षसः
५ स भग्नबाहुः संविग्नो निपपाताशु राक्षसः धरण्यां मेघसंकाशो वज्रभिन्न इवाच
लः ६ मुष्टिभिर्जानुभिः पद्भिः सूदयन्तौ च राक्षसं उद्यम्योद्यम्य चाप्येनं स्थण्डिले निष्पिपेषतुः ७

क्रुद्धस्तदा रामं सलक्ष्मणम् १४ स विनद्य महानादं शूलं शक्रध्वजोपमम् प्रगृह्याशोभत तदा
व्यात्तानन इवान्तकः १५ अथ तौ भ्रातरौ तत्र शरवर्षं ववर्षतुः विराधे राक्षसे तस्मिन्कालां
तकयमोपमे १६ स प्रहस्य महारौद्रः स्थित्वाजृम्भत राक्षसः जृम्भमाणस्य च ततः कायान्नि
पेतुराशुगाः १७ वलात्तु वरदानस्य प्राणान्संनिरुध्य स राक्षसः विराधः शूलमुद्यम्य रा
घवावभ्यसर्ज्जोपत १८ तच्छूलं वज्रसंकाशं गगने ज्वलनोपमम् द्वाभ्यां शराभ्यां चिच्छेद
रामः शस्त्रभृतां वरः १९ तद्रामविशिखैश्छिन्नं शूलं तस्यापि पातितम् पपाताशनि
नाच्छिन्नं मेरोरिव शिलातलम् २० तौ खड्गौ क्षिप्रमुद्यम्य कृष्णसर्पोपमौ भुजौ तू
र्णमापततस्तस्य तदा प्रहरतां बलात् २१ स वध्यमानः सुभृशं भुजाभ्यां परिगृह्य तौ
अप्रकम्प्यौ नरव्याघ्रौ रौद्रः प्रस्थातुमैच्छत २२ तस्याभिप्रायमाज्ञाय रामो लक्ष्मणम
मब्रवीत् वहत्वयमलं तावत्पथानेन तु राक्षसः २३ बालाविव स्कंधगतौ चकाराति

भक्तमुवाच माम् त्वत्प्रसादान्मुक्तोहमभिशापात्सुदारुणात् १९ भवनं स्वं गमिष्यामि स्वस्ति तेस्तु
परंतप २० इतो वसति धर्मात्मा शरभंगः प्रतापवान् अध्यर्द्धयोजने तात महर्षिः सूर्यसन्निभः
तं क्षिप्रमभिगच्छ त्वं स ते श्रेयो विधास्यति २१ अवटे चापि मां राम निःक्षिप्य कुशली व्रज रक्ष
सां गतसत्वानामेष धर्मः सनातनः २२ अवटे ये निधीयंते तेषां लोकाः सनातनाः एवमुक्त्वा
तु काकुत्स्थं विराधः शरपीडितः २३ बभूव स्वर्गसंप्राप्तो न्यस्तदेहो महाबलः तच्छ्रुत्वा राघ
६ वो वाक्यं लक्ष्मणं व्यादिदेश ह २४ कुंजरस्येव रौद्रस्य राक्षसस्यास्य लक्ष्मण महतः सुम ६
८ हच्छ्वभ्रं खन्यतां रौद्रकर्मणः २५ इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति तस्थौ वि
राधमाक्रम्य कंठे पादेन वीर्यवान् २६ ततः खनित्रमादाय लक्ष्मणः श्वभ्रमुत्तमम् अ
खनत्पार्श्वतस्तस्य विराधस्य महात्मनः २७ तं मुक्तकंठमुत्क्षिप्य शंकुकर्णं महास्वन
म् विराधं प्राक्षिपच्छ्वभ्रे नदंतं भैरवस्वनम् २८ तमाहवे निर्जितमाशुविक्रमौ स्थिता

सविद्धोवलुभिर्वीरौः खड्गाभ्यांचपरिक्षतः निःपिष्टोबहुधाभूमौनममारसराक्षसः ८ तंप्रेक्ष्य
रामः सुभृशामवध्यमचलोपमम् भयेष्वभयदः श्रीमानिदंवचनमब्रवीत् ९ तपसापुरु
षव्याघ्रराक्षसोऽयंनशक्यते शस्त्रेणयुधिनिर्जेतुंराक्षसंनिखनावहे १० कुंजरस्येवरौद्रस्य
राक्षसस्यास्यलक्ष्मण महतोऽस्यमहच्छ्वभ्रंखन्यतांरौद्रवर्चसः ११ इत्युक्त्वालक्ष्मणंरामप्रदरः
खन्यतामिति तस्थौविराधमाक्रम्यकंठेपादेनवीर्यवान् १२ तच्छ्रुत्वाराघवेणोक्तंराक्ष
सः प्रश्रितंवचः इदंप्रोवाचकाकुत्स्थंविराधःपुरुषर्षभम् १३ हतोऽहंपुरुषव्याघ्रशक्रतुल्य
बलेनवै मयातुपूर्वंत्वंमोहान्नज्ञातःपुरुषर्षभ १४ कौशल्यासुप्रजारामविदितस्त्वंमयाधु
ना वैदेहीचमहाभागा लक्ष्मणश्चमहायशाः १५ अभिशापादहंघोरांप्रविष्टोराक्षसीं
तनुम् तुंबुरुर्नामगंधर्वः शप्तोवैश्रवणेनहि १६ प्रसाद्यमानश्चमयासोऽब्रवीन्माम
हायशाः यदादाशरथीरामस्त्वांवधिष्यतिसंयुगे १७ तदाप्रकृतिमापन्नोभवान्स्व
र्गंगमिष्यति अनुपस्थीयमानोमांसंक्रुद्धोव्याजहारह इतिवैश्रवणोराजारंभा

वा०रा०
आ०

च वीर्यवान् १ अब्रवील्लक्ष्मणं रामो भ्रातरं दीप्ततेजसम् कष्टं वनमिदं दुर्गं न चास्म वनगोचराः २
अभिगच्छामहे शीघ्रं शरभंगं तपोधनम् आश्रमं शरभंगस्य राघवोभिजगाम ह ३ तस्य देवप्र
भावस्य तपसा भावितात्मनः समीपे शरभंगस्य ददर्श महदद्भुतम् ४ विभ्राजमानं वपुषा सूर्य
वैश्वानरप्रभम् रथप्रवरमारूढमाकाशे विबुधानुगम् ५ असंस्पृशन्तं वसुधां ददर्श विबुधे
श्वरम् सुप्रभाभरणं देवं विरजोंबरधारिणम् ६ तद्विधैरेव बहुभिः पूज्यमानं महर्षिभिः
७ हरिभिर्वाजिभिर्युक्तमंतरिक्षगतं रथम् ७ ददर्शादूरतस्तस्य तरुणादित्यसन्निभं पांडुराभ्रघन ७
7 प्रख्यं चन्द्रमंडलसन्निभम् ८ अपश्यद्विमलं छत्रं चित्रमाल्योपशोभितम् चामरव्यजने चा
ग्र्ये रुक्मदंडे महाधने ९ गृहीते वरनारीभ्यां धूयमाने च मूर्द्धनि गंधर्वामरसिद्धाश्च बहवः पर
मर्षयः १० अंतरिक्षगतं देवं गीर्भिरग्र्याभिरस्तुवन् सहसंभाषमाणे तु शरभंगेन वासवे ११ दृष्ट्वा शत
क्रतुं तत्र रामो लक्ष्मणमब्रवीत् रामोपि रथमुद्दिश्य भ्रातुर्दर्शयताद्भुतम् १२ अर्चिष्मन्तं श्रिया जु
ष्टं अद्भुतं पश्य लक्ष्मण प्रतपन्तमिवादित्यमंतरिक्षगतं रथम् १३ ये हयाः पुरुहूतस्य पुरा शक्रस्य

वुभौ संपतितौ रामलक्ष्मणौ मुदान्वितौ विक्षिपतुर्भयावहं नदन्तमुत्क्षिप्य बलेन राक्षसम् २९
असह्यतां प्रेक्ष्य महासुरस्य तौ शितेन शस्त्रेण तदा नरर्षभौ समर्थ चात्यर्थविशारदावुभौ अवि
ले विराधस्य वधं प्रचक्रमः ३० स्वयं विराधेन हि मृत्युरात्मनः प्रसह्य रामेण वधार्थमीप्सि
तः निवेदितः काननचारिणा स्वयं न मे वधः शस्त्रकृतो भवेदिति ३१ तथैव रामेण शा
निशम्य भाषितं कृता मतिस्तस्य बिलप्रवेशने विलंघते नातिबलेन रक्षसा प्रविश्य
मानेन वनं विनादितम् ३२ प्रहृष्टरूपाविव रामलक्ष्मणौ विराधमुर्व्यां प्रदरे निपा
त्यतम् ननन्दतुर्वीतभयौ महावने शिलाभिरन्तर्दधतुश्च राक्षसम् ३३ ततस्तु तौ का
चनचित्रकार्मुकौ निहत्य रक्षः परिगृह्य मैथिलीम् विजह्रतुस्तौ मुदितौ महावने दिवि स्थि
तौ चन्द्रदिवाकराविव ३४ इत्यार्षे रामायणे वाल्मीकीये आरण्यकाण्डे चतुर्थः सर्गः ४ दृष्टा
दिवसकथा समाप्ताः हत्वा तु तं भीमबलं विराधं राक्षसं वने ततः सीतां परिष्वज्य समाश्वास्य

मंत्रयमानं पिता च ना पसम् २४ रथेन हरियुक्तेन ययौ दिवमरिंदमः प्रयाते तु सहस्राक्षे राघ
वः सपरिच्छदे २५ अग्निहोत्रमुपासीनं शरभंगमुपागमत् तस्य पादौ च संगृह्य रामः सीता च ल
क्ष्मणाः २६ निषेदुस्तदनुज्ञाता लब्धवासा निमंत्रिताः ततः शक्रोपयानं तत्पर्यपृच्छ
त्स राघवः २७ शरभंगश्च तत्सर्वं राघवाय न्यवेदयत् मामेष वरदो राम ब्रह्मलोकं
निनीषति २८ जितमुग्रेण तपसा दुःप्रापमकृतात्मभिः अहं ज्ञात्वा नरव्याघ्र वर्तमानम
दूरतः २९ ब्रह्मलोकं न गच्छामि त्वामदृष्ट्वा प्रियातिथिम् त्वयाहं पुरुषव्याघ्र धार्मि
केन महात्मना ३० समागम्य गमिष्यामि त्रिदिवं देवसेवितम् अक्षया नरशार्दूल जिता
लोका मया शुभाः ३१ ब्राह्म्याश्च नाकपृष्ठ्याश्च प्रतिगृह्णीष्व मामकान् एवमुक्तो नर
व्याघ्रः सर्वशास्त्रविदां वरः ३२ ऋषिणा शरभंगेन राघवो वाक्यमब्रवीत् अहमेवाहरिष्या
मि सर्वलोकान्महामुने ३३ आवासं त्वहमिच्छामि प्रदिष्टमिह कानने राघवेणैवमुक्तस्तु

नः श्रुताः ॥ अंतरिक्षगता दिव्यास्त इमे हरयो ध्रुवम्‌ १४ इमे च पुरुषव्याघ्रं पतिष्ठंत्यमितौजसं
शतं शतं कुण्डलिनो युवानः खड्गपाणयः १५ विस्तीर्णविपुलोरस्काः परिघायतबाहवः
शोणांशुवसनाः सर्वे व्याघ्रा इव दुरासदाः १६ उरोदेशेषु सर्वेषां हारा ज्वलनसन्निभाः रूपं
बिभ्रति सौमित्रे पंचविंशतिवार्षिकम्‌ १७ एतद्धि किल देवानां वयो भवति नित्यदा य इमे
पुरुषव्याघ्राः प्रपन्ते प्रियदर्शनाः १८ इहैव सह वैदेह्या मुहूर्त्तं तिष्ठ लक्ष्मण यावज्जा
नाम्यहं व्यक्तं क एष द्युतिमान्‌ नृपे १९ तमेवमुक्त्वा सौमित्रिमिहैव स्थाप्यतामिति अभि
चक्राम काकुत्स्थः शरभंगाश्रमं प्रति २० ततः समभिगच्छंतं प्रेक्ष्य रामं शचीपतिः शरभंग
मनुज्ञाप्य विबुधानिदमब्रवीत्‌ २१ इहोपयात्यसौ रामो यावन्मां नाभिभाषते निष्ठां नय
तु तावत्तु ततो मां द्रष्टुमर्हति २२ तावद्गच्छाम हे शीघ्रं यावन्मां नाभिभाषते जितवंतं कृता
र्थं च द्रष्टा द्रक्ष्याम्यहमहं हरिम्‌ २३ कर्म ह्यनेन कर्तव्यं महदन्यैः सुदुष्करम्‌ इति वज्री तमा